# shrI shAkambharIdhyAnam

# श्री शाकम्भरीध्यानम्

## Document Information

Text title : shAkambharI dhyAnaM

File name : shAkambharIdhyAnam.itx

Category : devii, shAkambharI, dhyAnam, devI

Location : doc_devii

Latest update : August 18, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 22, 2023

*sanskritdocuments.org*

# श्री शाकम्भरीध्यानम्

ध्यानम् ।
शान्ता शारदचन्द्रसुन्दरमुखी शाल्यन्नभोज्यप्रिया
शाकैः पालितविष्टपा शतदृशा शाकोल्लसद्विग्रहा ।
श्यामाङ्गी शरणागतार्तिशमनी शक्रादिभिः शंसिता
शङ्कर्यष्टफलप्रदा भगवती शाकम्भरी पातु माम् ॥ १॥

शूलं पाशकपालचापकुलिशान्बाणान्सृणिं खेटकां
शङ्कं चक्रगदाहिखङ्गमभयं खट्वाङ्गदण्डान्धराम् ।
वर्षाभाववशाद्धतान्मुनिगणान्शाकेन या रक्षति
लोकानां जननीं महेशदयितां तां नौमि शाकम्भरीम् ॥ २॥

सौवर्णसिंहासनसंस्थितां शिवां त्रिलोचना चन्द्रकलावतंसिकाम् ।
शूलं कपालं निजवामहस्तयोस्तदन्ययोः खङ्गमभीतिमुद्रिकाम् ॥ ३॥

पाण्योर्दधानां मणिभूषणाज्ज्वलां सुवाससं माल्यविलेपनाञ्चिताम् ।
प्रसन्नावक्त्रां परदेवता मुदा ध्यायामि भक्त्या वनशङ्करीं हृदि ॥ ४॥

खङ्गं घण्टां त्रिशूलं लिपिविशदतरं बिभ्रतीं दक्ष हस्तैः
पात्रं शीर्षं सुखेटं डमरुकमनिशं वामहस्तैस्त्रिनेत्राम् ।
सिंहस्थां तारहारां गदमणिमुकुटां द्योतयन्तीं प्रसन्नां
वन्दे पूर्णेन्दुबिम्बां प्रतिरुचिरमुखीं शङ्करीं शंकरेष्टाम् ॥ ५॥

शूलं खङ्गं च डमरुं दधानामभयप्रदम् ।
सिंहासनस्थां ध्यायामि देवी शाकम्भरीमहम् ॥ ६॥

ॐ शताक्ष्यै नमः ।
ॐ शाकम्भर्यै नमः ।
ॐ वनशङ्करी नमः ॥

*shrI shAkambharIdhyAnam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*